॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## गुरु अष्टकम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# गुरु अष्टकम्

शरीरं(म्) सुरुपं(न्) तथा वा कलत्रं(म्)
यशश्चारू चित्रं(न्) धनं(म्) मेरुतुल्यम् ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 1 ॥

कलत्रं(न्) धनं(म्) पुत्रपौत्रादि सर्वं(म्)
गृहं(म्) बान्धवाः(स्) सर्वमेतद्धि जातम् ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(ङ्) ततः(ख्) किम् ॥ 2 ॥

षडं(ङ्)गादिवेदो मुखे शास्त्रविद्या
कवित्वादि गद्यं(म्) सुपद्यं(ङ्) करोति ।
मनश्चेन्न लग्नं(ङ्।) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 3 ॥

विदेशेषु मान्यः(स्) स्वदेशेषु धन्यः(स्)
सदाचारवृत्तेषु मत्तो न चान्यः ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 4 ॥

क्षमामण्डले भूपभूपालवृन्दैः(स्)
सदा सेवितं(म्) यस्य पादारविन्दम् ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 5 ॥

यशो मे गतं(न्) दिक्षु दानप्रतापात्
जगद्वस्तु सर्वं(ङ्) करे सत्प्रसादात् ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 6 ॥

न भोगे न योगे न वा वाजिराजौ
न कान्तासुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ 7 ॥

अरण्ये न वा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥ ८ ॥

अनर्घ्याणि रत्नादि मुक्तानि सम्यक्
समालिंगिता कामिनी यामिनीषु ।
मनश्चेन्न लग्नं(ङ्) गुरोरं(ङ्)घ्रिपद्मे
ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किं(न्) ततः(ख्) किम् ॥

गुरोरष्टकं(म्) यः(फ्) पठेत्पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेत् वां(ञ्)छितार्थ पदं(म्) ब्रह्मसं(ञ्)ज्ञं(ङ्)
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥

श्री शङ्कराचार्य कृतं!

